Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# महाभाष्यवचनाच्च सर्वेषां शब्दानां धातुप्रत्यनिष्यन्तत्वात् को नाम धात्वर्थ ?

**डॉ. छगन लाल महोलिया**

**सह आचार्य (संस्कृत), श्री रतनलाल कंवरलाल पाटनी राजकीय स्नातकोत्तर महाविद्यालय, किशनगढ़, अजमेर।**

**Article Info**
Volume 3, Issue 5
Page Number : 330-331
**Publication Issue :**
September-October-2020
**Article History**
Accepted : 20 Sep 2020
Published : 30 Sep 2020

इति महाभाष्यवचनाच्च सर्वेषां शब्दानां धातुप्रत्ययनिषप्नन्तत्वात् को नाम धात्वर्थ इति जिज्ञासा कस्य हृदयाम्बुजे नोदेति ? दार्शनिकानां मते धात्वर्थविषये पर्याप्तं वैमत्यमवलोक्यते । वैयाकरणानां मतद्वयं वर्तते । प्राचीनं नवीनं च । वैयाकरणास्तु फलव्यापारयोः धातुवाच्यत्वं स्वीकुर्वन्ति आख्यातार्थश्च कर्तृकर्मणी । तत्र आख्यातार्थकर्तुरपि' चैत्रः ओदनं पचति' चैत्रादिनाऽभेदेनान्वयः फलञ्च अनुकूलत्वसम्बन्धेन व्यापारे विशेषणम् आख्यातार्थकर्तुरपि व्यापारे एव निरूपकत्वसम्बन्धेनाऽन्वयः व्यापारमुख्यविणेष्यकश्च शाब्दबोधः' भावप्रधानमाख्यातम्' सत्त्वप्रधानानि नामानि' इति निरुक्तवचनात्। तण चोक्तं कौण्डभट्टेन

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इति गौतमसूत्रोक्तप्रमाणेषु वैयाकरणैः प्रधानतया शब्दस्य प्रामाण्यमुरीक्रियते । तदुक्तम्महाभाष्ये' शब्द प्रमाणका वयम् यच्छब्द आह तदस्माकम्प्रमाणम्' तत्र' नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्यो वैयाकरणानां चैके इति निरुक्तवचनात्

नाम च धातुजमाह निरुक्ते।
व्याकरणे शकटस्य च तोकम्।।
फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिर्थस्तु विशेषणम्।। इति।

फलव्यापारौ धातुवाच्यौ आख्यातार्थः कर्तृकर्मणी व्यापारमुख्यविशेष्यकशाब्दबोधश्चेति वैयाकरणानां मतम्।

तत्र को नाम व्यापार इति जिज्ञासायां कौण्डभट्टा: साध्यत्वेनाभिधीयमानायाः क्रियाया एव व्यापारत्वं स्वीकुर्वन्ति । उक्तञ्च तैः - व्यापारस्तु भावनाभिधा साध्यत्वेनाविधीयमाना क्रिया। भर्तृहरिणाऽप्युक्तम्

यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते।।

अनेन लक्षणेन ज्ञायते यद् व्यापाररूपा क्रिया द्विविधा भवति - सिद्धा साध्या च । तत्र साध्यस्वभावक्रिया तिङन्तस्थले सिद्धस्वभावक्रिया च कृदन्तस्थले भवति । साध्यरूपक्रिया तत्रैव भवति यत्र क्रियान्तराकाङ्क्षा न भवति । यथा - गच्छति इत्यत्र प्रतीयमाना उत्तरदेशसंयोगानुकूलव्यापाररूपा क्रिया साध्यस्वभावा । उक्तञ्च कौण्डभट्टेन - तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेकरूपत्वं साध्यत्वम् । अनुभव एव क्रियायाः साध्यत्वे प्रमाणम्, तथाहि पचति' पाकः' इत्यत्र धात्वर्थः विक्लित्त्यनुकूलव्यापाररूपोऽस्ति, किन्तु पाकः इत्यत्र क्रियान्तराकाङ्क्षा भवति पचति इत्यत्र क्रियान्तरस्य आकाङ्क्षा न भवति । अतः' पचति गच्छति' इत्यत्र साध्यरूपैव क्रिया । पाक इत्यत्र पच्यातुवाच्या क्रिया साध्यस्वभावा प्रत्ययघजादिवाच्या च सिद्धस्वभावा इति सिध्यति। उक्तञ्च कौण्डभट्टेन.

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घजादिनिबन्धनः।।
वस्तुतः सांध्यत्वेन प्रतीयमाना क्रिया एव व्यापारः।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

नागेशमते व्यापारस्य स्वरूपं११ धात्वर्थफलजनकत्वे सति धातुवाच्यत्वम्। यथा पचादिधातौ फूत्कारादिव्यापाराः धातुवाच्याः सन्ति। सर्वेषामेव तेषां व्यापाराणां धातुवाच्यत्वात्। उक्तञ्च -' अयञ्च १२ व्यापारः फूत्कारत्वाधःसन्तापनत्वयत्नत्वादितत्तद्रूपेण वाच्यः।' पचति' इत्यादौ तत्तत्प्रकारक बोधस्यानुभवसिद्धत्वात्। न च पच्यातोरनेकव्यापारवाचकत्वे' नानाधर्मावच्छिन्नशक्यतानिरूपितैकधर्मावच्छिन्न शक्ततावत्त्वरूपनानार्थतापत्तिः स्यादिति चेत् - अत्रोच्यते बुद्धिविशेषस्य शक्यतावच्छेदकत्वस्वीकारेण न नानार्थतापत्तिः। उक्तञ्च वाक्यपदीयेऽपि

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्धया प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते।।१३।

तस्मात् - फूत्काराधः श्रयणाधिश्रयणादिसर्वेषां धातुवाच्यत्वात् धात्वविक्लित्तिजनकत्वाच्च व्यापारत्वमक्षुण्णमेव।

वैयाकरणभूषणसारस्य दर्पणव्याख्यायां यदिदं व्यापारलक्षणं खण्डितं तन्न समीचीनम्। युक्तिविरुद्धत्वात्। तथा हि -' अत एव न तज्जन्यत्वे सति तज्जन्यजनकत्वरूपं तन्त्रान्तरप्रसिद्धं तत्। तदवच्छिन्नस्य धातुवाच्यत्वे साक्षाद्विक्लित्तिजनकान्तिमानिसंयोगदशायां' पचति' प्रयोगः स्यात् न त्वधिश्रयणादिदशायामपि तेषामन्तिमाग्निसंयोगेनान्यथासिद्धतयाविक्लित्त्यजनकत्वात् इति।

सिद्धान्ते तु तेषामन्यथासिद्धत्वाभावाद् विक्लित्तिं प्रति जनकत्वेन तज्जन्यत्वे सति तज्जन्यजनकत्वमस्त्येवेति न कश्चन दोषः। तस्मात् नागेशमते' व्यापारत्वं तज्जन्यत्वे सति - तज्जन्यजनकत्वरूपम्। कौण्डभट्टमते साध्यत्वेनाभिधीयमाना क्रिया एव व्यापारः इति।

मयायंमाशयः

एवञ्च फलाभावात् व्यापारमात्रमेवार्थोऽस्त्यादीनाम्। अतः फलव्यधिकरणव्यापारवाचकत्वरूपं सकर्मकत्वं तेषां नास्ति। तस्यायमाशयः - यदि तत्र फलांशस्य प्रतीतिर्नास्ति। अतः फलव्यधिकरणव्यापारवाचकत्वमपि नास्ति तर्हि तद्वाच्ये व्यापारे तद्वाच्यफलजनकत्वं कथं स्यात्, फलांशाभावात् धातुवाच्यव्यापारे धातुवाच्यफलजनकत्वं कथं स्यात्, फलांशाभावात् धातुवाच्यव्यापारे धातुवाच्यफलजनकत्वाभावात् धातुवाच्यत्वे सति धातुवाच्यफलजनकत्वं व्यापारे नास्ति, अतः अव्याप्तिदोषः, अतः नागेशाभिमतव्यापारलक्षणं अव्याप्तिदोषग्रस्तत्वात् न समीचीनम्।

वस्तुतः कौण्डभट्टाभिमत एव व्यापारो युक्तियुक्तत्वात् स्वीकरणीयः, नागेशभट्टाभिमत व्यापारस्वीकारे तु नागेशवचनैरेव विरोधः स्यात्। तथाहि सकर्मकत्वाकर्मकत्वस्वरूपविवेचनप्रसङ्गे तदुक्तम् क्वचित्तु५ फलंशाभावदकर्मकत्वम्। यथाऽस्त्यादौ केवलं सत्तादिरेवार्थः, अत्र फलांशस्य सूक्ष्मदृष्ट्याप्यप्रतीतेः इति।

**सन्दर्भाः**

१. गौतमन्यायदर्शनम्, १. १. ३
3 यास्कनिरुक्तम्, १. ४. १
निरुक्तम्, १. ९
5. वै. भू. सा. धावनिर्णये
9. वै. भू. सा. धात्वर्थनिर्णये
११. परमलघुमञ्जूषायां, धात्वर्थविचारः
15. वाक्यपदीयम् क्रियासमुद्देशः ४
प. ल. म. धात्वर्थनिरूपणे
2. महाभाष्यम् १. १. १
4. महाभाष्यम् १. १. १
6. वै. भू. सा. कारिका २
8. वाक्यपदीयम - क्रियासमुद्देशः, १
10 .वाक्यपदीयम् २. ८.
12. ४८ वै. भू. सा. धात्वर्थनिर्णये
14. वै. भू. सा. दर्पणटीकायाम्, पृ. १६